# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-शास्त्री-3(SEM-6) | **प्रश्नपत्रम्** - ७ | **गुणाः** - ७० |
| **विषयः** - पौरोहित्यम् | **कोड- CE- 3611** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ०५/०४/२०१९ | **सन्दर्भग्रन्थः**- याज्ञिकन्यायमाला। | |

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः श्लोकयोः व्याख्या विधीयताम्।** **१०**

१ वसोर्द्धाराः सप्त पूज्या न वाभ्युदयहीनके। तदङ्गत्वाद्विहीने नो पूज्याः स्युर्घृतमातरः॥

२ व्रते विसृज्यमाने यो दण्डो वैणव उच्यते। तत्र मानं वर्णभेदान् नो वा दण्डत्वसाम्यतः॥

३ मन्त्रेषु वर्तते तेन न योज्योऽधिकतावशात्। वैदिकप्रणवादित्वविधिर्नैव तु तान्त्रिके॥

**प्रश्नः २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ गणोपायनाधिकरणम् यथाशास्त्रं विवेचयत।

२ चतुर्थाध्यायस्य महत्त्वं वर्णयत।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः श्लोकयोः व्याख्या विधीयताम्।** **१०**

१ न योज्या, मूलविरहान्, मैवं कल्पानुमोदनात्।
लौकिकाः पाकयज्ञाः स्युः क्वचिद् वागपि लौकिकी॥

२ किं वृक्षा एव विज्ञेयाः फलान्नमितरद्धि वा।
वृक्षातिरिक्ता येऽमूला देशाचारानुबन्धिनः॥

३ जपे प्रसज्यते तेन वक्तव्यं तदपि ध्रुवम्।
यथा विध्येकवाक्यत्वादर्थवादा अपि श्रुतिः॥

**प्रश्नः ४ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ पूर्णफलाधिकरणं यथाशास्त्रं विवेचयत।

२ यान्त्रिकगीतनृत्यवादित्रादीनामुपचारासाधकताधिकरणं यथाशास्त्रं वर्णयत।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः श्लोकयोः व्याख्या विधीयताम्।** **१०**

१ देवानां विग्रहो नैव याज्ञिकेष्वथवास्ति हि।
मन्त्रात्मिका देवतेति सिद्धान्तादाकृतिर्न हि॥

२ दशगात्रक्रियाभावे न श्राद्धं तस्य सम्भवेत्।
भोक्तुर्जीवस्य वपुषो विरहे भोक्तृभावतः॥

३ 'मुक्तश्राद्धं न कर्त्तव्यं' शास्त्रे नैवञ्च दृश्यते।
तस्मान्न मुक्तकार्यान्ते श्राद्धत्यागो विधीयताम्॥

**प्रश्नः ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ मुक्तिफलकश्राद्धोत्तरं श्राद्धकर्तव्यताधिकरणं वर्णयत।

२ फलपेटिकाध्यायस्य कर्मणः फलदातृत्वाधिकरणं प्रतिपादयत।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१ दण्डग्रहणमात्रेण नरः किं भवति?

२ कात्यायनानुसारं यज्ञस्य लक्षणं किम्?

३ 'वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः' कुत्र श्रूयते?

४ देवता शब्दात्मिकेति के मन्यन्ते?

५ काः सन्ति सप्त घृतमातरः?

६ नान्दीश्राद्धं कदा कर्तव्यम्?

७ रथकारस्याधाने अधिकारः अस्ति न वा?

८ ब्राह्मणस्य कृते दण्डप्रमाणं किम्?

९ जातकर्मसंस्कारे कुमारस्य नामकरणं कः करोति?

१० 'लभ्यमाने फलेदृष्टे नादृष्टफलकल्पना' - वचनमिदं वर्तते -

११ 'अपशवो वा अन्ये गोअश्वेभ्यः' इत्यत्र अपशुशब्दस्य कोऽर्थः?

१२ 'एष हि हव्यवाहनः' इति कथनेन हव्यवाहनः कः?

१३ राजसूययागे का दक्षिणा?

१४ 'लोके भवा लौकिकाः' इत्यत्र लोकशब्देन किं ज्ञायते?

१५ वैष्णवदण्डग्रहणे पारस्करस्य वचनं किम्?

०००